श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीरङ्गनाथ पादुकासहस्रम् ॥

## ॥ फलपद्धतिः द्वात्रिंशी ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ फलपद्धतिः द्वात्रिंशी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

उपाख्यातां तथात्वेन वसिष्ठाद्यैर्महर्षिभिः।
उपायफलयोः काष्ठामुपासे रामपादुकाम्॥ ३२.१ ॥

निविशेय निरन्तरं प्रतीतः त्रिदशानां विभवं तृणाय मत्वा।
सविधे तव देवि ! रङ्गभर्तुः पदलीलाकमलं समुद्वहन्त्याः॥ ३२.२ ॥

किमहं मणिपादुके ! त्वया मे
सुलभे रङ्गनिधौ श्रिया सनाथे।
करणानि पुनः कदर्थयेयं
कृपणद्वारदुरासिकादिदुःखैः॥ ३२.३ ॥

सकृदप्यनुभूय रङ्गभर्तुः त्वदुपश्लेषमनोहरं पदाब्जम्।
अपुनर्भवकौतुकं तदेव प्रशमं गच्छति पादुके ! मुनीनाम्॥ ३२.४ ॥

अपरस्परपातिनाममीषाम् अनिदम्पूर्वनिरूढसन्ततीनाम्।
भरतव्यसनादनूनसीम्नां दुरितानां मम निष्कृतिस्त्वमासीः॥ ३२.५ ॥

त्वदुपासनसम्प्रदायविद्भिः
समये सात्त्वतसेविते नियुक्ताः।
भरतव्रतिनो भवाम्बुराशिं
कतिचित् काञ्चनपादुके ! तरन्ति॥ ३२.६ ॥

अलमच्युतपादुके ! यथावत् भवती यच्च पदं त्वदेकधार्यम्।
इतरेतरभूषितं तदेतत् द्वितयं संवननाय चेतसो नः॥ ३२.७ ॥

अनन्यसामान्यतया मुरारेः
अङ्गेष्ववाप्तेषु किरीटमुख्यैः।

पादावनि ! त्वं निजमेव भागं
सर्वात्मसाधारणतामनैषीः॥ ३२.८ ॥

समाश्रितानां मणिपादुके ! त्वां
विपश्चितां विष्णुपदेऽप्यनास्था।
कथं पुनस्ते कृतिनो भजेरन्
वासादरं वासवराजधान्याम्॥ ३२.९ ॥

विमृश्य रङ्गेश्वरपादरक्षे !
वारक्रमं नूनमवारणीयम्।
पद्माग्रहेऽपि स्पृशती प्रतीता
स्थूलेन रूपेण वसुन्धरा त्वाम्॥ ३२.१० ॥

अभिरक्षसि त्वमनपायनिधिं
मणिपादुके ! मधुभिदश्चरणम्।
अत एव देवि ! तदनन्यधनाः
शिरसा वहन्ति भवतीं कृतिनः॥ ३२.११ ॥

पदयुगमिव पादुके ! मुरारेः
भवति विभूतिरकण्टका त्वयैव।
कथमिव हृदयानि भावुकानां
त्वदनुभवादुपजातकण्टकानि॥ ३२.१२ ॥

ज्ञानक्रियाभजनसीमविदूरवृत्तेः
वैदेशिकस्य तदवाप्तिकृतां गुणानाम्।
मौळौ ममासि मधुसूदनपादुके ! त्वं
गङ्गेव हन्त पतिता विधिनैव पङ्गोः॥ ३२.१३ ॥

रङ्गेश्वरस्य यदिदं मणिपादरक्षे !
पादारविन्दयुगळं भवतीसमेतम्।
पुंसामुपोषितविलोचनपारणार्हं
क्षीरं तदेतदिह शर्करया समेतम्॥ ३२.१४ ॥

कामादिदोषरहितं त्वदनन्यकामाः
    कर्म त्रयोदशविधं परिशीलयन्तः।
पादावनि ! त्वदनुषङ्गविशेषदृश्यम्
    एकान्तिनः परिचरन्ति पदं मुरारेः॥ ३२.१५ ॥

मौळौ स्थिता मखभुजामथवा श्रुतीनां
    तद्रङ्गराजचरणावनि ! वैभवं ते।
अस्मादृशामपि यदि प्रथितं ततः स्यात्
    सौलभ्यमम्ब ! तदिदं तव सार्वभौमम्॥ ३२.१६ ॥

स्वप्नेऽपि चेत् त्वमसि मूर्धनि सन्निविष्टा
    नम्रस्य मे नरकमर्दनपादरक्षे !।
स्थाने तदेतदिह देवि ! यतः समाधौ
    सन्तो विदुस्तमपि तादृशबुद्धिगम्यम्॥ ३२.१७ ॥

बद्धाञ्जलिः परिचरन्नियमेन रङ्गे
    विश्राणिताच्युतनिधिं मणिपादुके ! त्वाम्।
कस्यापि कुणितदृशो धनिनः पुरस्तात्
    उत्तानयेय न कदाऽपि करं विकोशम्॥ ३२.१८ ॥

त्वय्यर्पितेन चरणेन सदध्वभाजः
    पादावनि ! प्रथितसात्त्विकभावदृश्याः।
रङ्गेशवद्विदधते मुहुरङ्गहारान्
    रङ्गे महीयसि नटा इव भावुकास्ते॥ ३२.१९ ॥

येन स्थिता शिरसि मे विधिनाऽधुना त्वं
    तेनैव देवि ! नियतं मम साम्पराये।
लक्ष्मीकरिष्यसि पदावनि ! रङ्गनाथं
    लक्ष्मीपदाम्बुरुहयावकपङ्कलक्ष्यम्॥ ३२.२० ॥

हरिचरणसरोजे भक्तिभाजां जनानाम्
    अनुकरणविशेषैरात्मनैवोपहास्यम्।

परिणमय दयार्द्रा पादुके ! तादृशं मां
    भरतपरिषदन्तर्वर्तिभिः प्रेक्षणीयम्॥ ३२.२१ ॥

दुरितमपनयन्ती दूरतः पादुके ! त्वं
    दनुजमथनलीलां देवतामानयन्ती।
अनितरशरणानामग्रिमस्यास्य जन्तोः
    अवशकरणवृत्तेरग्रतः सन्निधेयाः॥ ३२.२२ ॥

चरमनिगमगीते सप्ततन्तौ समाप्ते
    निजसदनसमीपे प्रापयिष्यन् विहारम्।
ज्वलनमिव भवत्योः सम्यगारोपयेन्मां
    प्रथमवरणवश्यः पादुके ! रङ्गनाथः॥ ३२.२३ ॥

पुनरुदरनिवासच्छेदनं सह्यसिन्धोः
    पुलिनमधिवसेयं पुण्यमाब्रह्मलाभात्।
परिणमति शरीरे पादुके ! यत्र पुंसां
    त्वमसि निगमगीता शाश्वतं मौळिरत्नम्॥ ३२.२४ ॥

बहुविधपुरुषार्थग्रामसीमान्तरेखां
    हरिचरणसरोजन्यासधन्यामनन्यः।
भरतसमयसिद्धां पादुके ! भावयंस्त्वां
    शतमिह शरदस्ते श्रावयेयं समृद्धिम्॥ ३२.२५ ॥

तिलकयसि शिरो मे शौरिपादावनि ! त्वं
    भजसि मनसि नित्यं भूमिकां भावनाख्याम्।
वचसि च विभवैः स्वैर्व्यक्तिमित्थं प्रयाता
    तदिह परिणतं मे तादृशं भागधेयम्॥ ३२.२६ ॥

अजनिषि चिरमादौ हन्त देहेन्द्रियादिः
    तदनु तदधिकस्स्सन्नीश्वरोऽहं बभूव।
अथ भगवत एवाभूवमर्थादिदानीं
    तव पुनरहमासं पादुके ! धन्यजन्मा॥ ३२.२७ ॥

त्वय्यायत्तौ भगवति शिलाभस्मनोः प्राणदानात्
    आस्त्रीबालं प्रथितविभवौ पादपद्मौ मुरारेः।
तामेवाहं शरसि निहितामद्य पश्यामि दैवात्
    आत्माधारां जननि भवतीमात्मलाभप्रसूतिम्॥ ३२.२८ ॥

कथङ्कारं लक्ष्मीकरकमलयोग्यं निजपदं
    निदध्याद्रङ्गेशः कुलिशकठिनेऽस्मिन्मनसि नः।
न चेदेवं मध्ये विशति दयया देवि ! भवती
    निजाक्रान्तिक्षुण्णस्मरशरशिखाकण्टकततिः॥ ३२.२९ ॥

क्रीडालौल्यं किमपि समये पादुके ! वर्जयन्ती
    निर्वेशं स्वं दिशसि भवतीनाथयोः श्रीधरण्योः।
मामप्येवं जनय मधुजित्पादयोरन्तरङ्गं
    रङ्गं याऽसौ जनयसि गुणैर्भारतीनृत्तरङ्गम्॥ ३२.३० ॥

इति रङ्गधुरीणपादुके ! त्वं
    स्तुतिलक्षेण सहस्रशो विमृष्टा।
सफलं मम जन्म तावदेतत्
    यदिहाशास्यमतः परं किमेतत्॥ ३२.३१ ॥

मातः स्वरूपमिव रङ्गपतेर्निविष्टं
    वाचामसीमनि पदावनि ! वैभवं ते।
मोहादभिष्टुतवतो मम मन्दबुद्धेः
    बालस्य साहसमिदं दयया सहेथाः॥ ३२.३२ ॥

ये नाम भक्तिनियताः कवयो मदन्ये
    मातः स्तुवन्ति मधुसूदनपादुके ! त्वाम्।
लप्स्ये गुणांशविनिवेशितमानसानां
    तेषामहं सबहुमानविलोकितानि॥ ३२.३३ ॥

सङ्घर्षयन्ति हृदयान्यसतां गुणांशे
    सन्तस्तु सन्तमपि न प्रथयन्ति दोषम्।

तद्रङ्गनाथचरणावनि ! ते स्तुतीनाम्
एका परं सदसतोरिह साक्षिणी त्वम्॥ ३२.३४ ॥

इत्थं त्वमेव निजकेळिवशादकार्षीः
इक्ष्वाकुनाथपदपङ्कजयोरनन्या।
स्वीयं पदावनि ! मया सुमहच्चरित्रं
सीतेव देवि ! सहजेन कवीश्वरेण॥ ३२.३५ ॥

पृथुकवदनशङ्कस्पर्शनीत्या कदाचित्
शिरसि विनिहितायाः स्वेन भूम्ना तवैव।
स्तुतिरियमुपजाता मन्मुखेनेत्यधीयुः
परिचरणपरास्ते पादुकेऽपास्तदोषाः॥ ३२.३६ ॥

यदि स्फीता भक्तिः प्रणयमुखवाणीपरिपणं
पदत्राणस्तोत्रं हृदि बिभृत रङ्गक्षितिभृतः।
निरुन्मादो यद्वा निरवधिसुधानिर्झरमुचो
वचोभङ्गीरेता न कथमनुरुन्धे सहृदयः॥ ३२.३७ ॥

जयति यतिराजसूक्तिः जयति मुकुन्दस्य पादुकायुगळी।
तदुभयधनास्त्रिवेदीमवन्ध्ययन्तो जयन्ति भुवि सन्तः॥ ३२.३८ ॥

॥ इति श्रीपादुकासहस्रे फलपद्धतिः द्वात्रिंशी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥